International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(1): 271-274
© 2026 IJMH
www.themultijournal.com
Received: 14-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# पदस्फोटनिराकरणम्

**प्रो. प्रभाकरप्रसादः**

वैयाकरणाः इत्थं मन्यन्ते अस्ति हि गणपतिरित्यादिपदेभ्यो गकारादिवर्णश्रवणसमनन्तरमर्थबोधः सर्वानुभवसिद्धः। स बोधः नैकैकस्माद्वर्णा-द्भवितुमर्हति; वर्णान्तराणां वैय्यर्थ्यापातात्। नापि वर्णसमुदायाद् भवितुमर्हति, वर्णसमुदायस्यासम्भवात्। वर्णानाममूर्ततया नित्यत्वपक्षे विभुत्वादेव वर्णसमुदायो न सम्भवति । वर्णानामनित्यत्वपक्षे क्षणिकत्वादेव वर्णसमुदायो न सङ्गच्छते। नापि वर्णसमुदायस्मृतेर्वा पदार्थबोधो भवितुमर्हति, क्रमश उच्चरितानामनेकवर्णानां युगपदेकज्ञानजनकत्वा-भावात्, युगपदेकस्मृतिजनकत्वाभावात् वर्णसमुदायज्ञानस्य वर्णसमुदायस्मरणस्य वासम्भवात् । एवं स्थितौ कथं पदार्थबोध उपपाद्यः इति चिन्तायामवश्यं गकारादिवर्णानां भेदेऽपि "गणपतिपदादेकस्मादयमर्थो ज्ञायते", "एकोऽयं शब्द" इति प्रतीत्या वर्णेभ्योऽतिरिक्तः कश्चन पदार्थबोधजनकः पदार्थः स्वीकार्यः इति निश्चीयते । तदुक्तं ग्रन्थकारैः-

**वर्णान्नैकैकतो बुद्धिरुपलब्धात् सतोऽपि वा ।**
**अदृष्टेरुपलब्धाद्वा स्मृताद्वा संहतान्न धीः ।।**
**अयोगात् समुदायस्य कारणानां च भेदतः।**
**अतो वर्णातिरिक्तात् सा शब्दादेवेति गम्यते ।। इति ।।**[1]

स एव पदार्थबोधजनकः वर्णेभ्योऽतिरिक्तः पदार्थः पदस्फोट इत्यभिधीयते । स्फुटति अर्थो यस्माद् इति व्युत्पत्त्या पङ्कजादिवद्योगरूढः स्फोटशब्दः। केवलयोगस्वीकारे वाच्यलक्ष्यव्यङ्ग्यानां चेष्टायाश्च व्यङ्ग्यार्थप्रतिपादकत्वेन तत्रातिव्याप्तेः । न च वाचकादिपर्यायः स्फोटशब्दः अप्रसिद्ध इति वाच्यम्। **"अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः"** इति हरिवंशे दृष्टत्वात्। स चायं पदस्फोटो द्विधा-सखण्डोऽखण्डश्चेति। तत्र पचति, रामः इत्यादिसुबन्ततितरूपः सखण्डपदस्फोटः। अर्थप्रत्यायको ऽखण्डपदस्फोटः । अयमखण्डपदस्फोटः सर्वैः पदस्थितवर्णैर्व्यज्यते।

यत्त्वत्र तार्किकवेदान्तिनः- यावद्वर्णव्यङ्ग्यो वा यत्किञ्चिद्वर्णव्यङ्ग्यो वा चरमवर्णव्यङ्ग्यो वा अखण्डपदस्फोटो भवतामभिमतः। न तावदाद्यः, आशु-विनाशिनां वर्णानां मेलनासम्भवात्। न द्वितीयः वर्णान्तराणां वैय्यर्थ्यापातात्, यथा गणपतिरित्यत्र गकारेणैव व्यंजिते पदस्फोटे णपादिवर्णानां वैयर्थ्यम् । नापि तृतीयः तथा सति पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितचरमवर्णेनेवार्थप्रतीतिसिद्धौ किं पदस्फोटेनेति पदस्फोटकल्पनैव व्यर्था स्यात् । अतः स्फोटवादो न युक्त इति।

अत्रोच्यते- पक्षत्रयमपि क्षोदक्षमम् । तत्राद्ये पक्षे वर्णानामनित्यत्वेऽपि वर्णानुभवजन्यसंस्कारजन्यस्मृतौ मेलनसम्भवान्न दोष; वर्णानां नित्यत्वे तु कालाकाशादिविभूनां द्रव्याणां तार्किकैर्यथा मेलनं स्वीक्रियते तथैव विभूनामपि नित्यानां वर्णानां मेलनं सम्भवतीति न कोऽपि दोषः। द्वितीयेऽपि पक्षे यत्किंचिद् वर्णव्यङ्ग्यः पदस्फोट इति स्वीकारे न वर्णान्तराणां वैयर्थ्यापातः; गकारोच्चारणे गस्फोटः उत गणपतिस्फोटः इत्यादिसन्देहसम्भवात् तत्सन्देहनिवर्तकत्वेन वर्णान्तराणां सार्थक्यात्। तृतीयपक्षानुसरणेऽपि न स्फोटकल्पना व्यर्था। यथा विजातीयतन्तुसंयोगविशिष्टचरमसंयोगस्यैव पटकार्यकारित्वेऽपि पटोऽतिरिक्तोऽवयवी तार्किकादीनां सम्मतः तथात्रापि पूर्वपूर्ववर्णानुभवजन्यचरम-वर्णेनैवार्थप्रतीतिसिद्धावपि “अस्मात्पदादयमर्थो ज्ञायते” इति प्रत्यक्षप्रतीत्या वर्णातिरिक्तः पदस्फोटः

स्वीकार्य इति न दोषः। अन्यथा पटोऽप्यतिरिक्तोऽवयवी न सिद्ध्येत्। तदुक्तं शब्दकौस्तुभे **"वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोट; अन्यथा कपालातिरिक्तघटासिद्धिप्रसङ्गः"** इति। तस्मात् स्फोटपक्षो निर्दुष्टः।

किं च लाघवमपि स्फोटस्वीकारे भवति। तथा हि- सन्ति नादेभ्योतिरिक्ता वर्णा इति सर्वेषां सम्मतम्। तत्र स्फोटानङ्गीकारे वर्णानां नित्यत्वमतेऽनित्यत्वमते च नदी, दीन, सरो, रस, राजा, जारेत्यादौ भिन्नार्थप्रतीत्यर्थमानुपूर्व्यः कल्पनीया; पूर्वपूर्ववर्णानुभव-जन्यसंस्कारसहितचरमवर्णस्य कारणता च वाच्या। वर्णानामनित्य-त्वमते तु अनन्तवर्णतत्प्रागभावप्रध्वंसा अपि कल्प्याः नादा वर्णानामभिव्यञ्जका इति वर्णनित्यत्वमते स्वीकार्या इति स्फोटानङ्गी-कर्तॄणां कल्पनाबाहुल्यं दृश्यते।

स्फोटवादिनान्तु एको नित्यः स्फोटः नादैर्व्यज्यत इत्यङ्गीकारात् न किमपि कल्पनीयमिति लाघवम्। एतेन स्फोटस्य नित्यत्वात् सर्वदार्थबोधापत्तिरित्यपास्तम्। नादैः स्फोटोऽभिव्यज्यत इत्यङ्गी-कारात् । तुदक्तम्-**"मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते"** इति।

यदुक्तं कैश्चित् - पर्यायस्थलेष्वेक एव स्फोटोऽभिमतः? नाना वा? नाद्यः, घटपद एवं गृहीतशक्तिकस्य कलशपदादर्थबोधप्रसङ्गात्। न च तत्पर्यायाभिव्यक्ते स्फोटे शक्तिग्रहस्तत्पर्यायश्रवणेऽर्थधीहेतुरिति कार्यकारणभावकल्पनान्न दोष इति वाच्यम्। एवं सति प्रतिपर्यायं शक्तिग्रहावश्यंभावेन घटात्मकपर्यायाभिव्यक्तस्फोटः कम्बुग्रीवादि-मद्वस्तुनो वाचकः; कलशात्मकपर्यायाभिव्यक्तस्फोटोऽपि कम्बुग्रीवादि-मद्वस्तुनो वाचकः, इत्येवं तत्तत्पर्यायगतशक्तिग्रहत्वेनैव कारणतोचिता, न तु तत्तत्पर्यायाभिव्यक्तस्फोटगतशक्तिग्रहत्वेनार्थबोधकारणता, कारणता-वच्छेदकगौरवात्। नापि द्वितीयः पर्यायस्थलेष्वनन्तस्फोटाः स्वीक्रियन्ते चेदेकस्यानन्ताः पर्याया इति यावन्तः पर्यायास्तावन्ति पदानि कल्पनीयानीति पदानन्त्यम्, तथानन्तानां पदानां तत्तदर्थे शक्तिः कल्पनीयेति शक्त्यानन्त्यं च कल्पनीयमित्यतीव गौरवं भवति । अतस्तदपेक्षया श्रवणेन्द्रियग्राह्याः क्लृप्ता ये वर्णास्तेष्वेव शक्तिकल्पन-स्योचित्वादिति। तन्न; पर्यायेष्वनतशक्तिस्वीकारस्य नैयायिकादिसर्वेषां सम्मतत्वान्न दोषः। समानप्रवृत्तिनिमित्तकत्वे सति विभिन्ना-नुपूर्विकत्वम्, शक्यतावच्छेदकैक्ये सति विभिन्नशक्ततावच्छेदकत्वं पर्यायत्वम्। तथा च स्फोटस्यैक्येऽपि शक्ततावच्छेकानुपूर्वी-भेदाच्छक्तिभेद; शक्यतावच्छेदकभेदेन शक्यभेदवद् युज्यते। पौर्वापर्यस्यानुपूर्वीविशिष्टस्फोटस्यैव वाचकत्वाङ्गीकारात् पर्यायस्थले न कोपि दोषलेशः। किं च वर्णातिरिक्तस्फोटस्य प्रत्यक्षसिद्धत्वान्न तस्यापलापस्तवैः शक्य इति सिद्धं वर्णेभ्योऽतिरिक्तात् पदस्फोटादेव पदार्थप्रत्ययो जायत इति। एवं च-

**प्रत्यक्षबलसिद्धस्य सुस्फोटस्य कुतर्कतः।**
**न शक्योऽपह्नवः कर्तुं सर्वं विजयते हि तत्।।**

**पदस्फोटनिरासः-**

अत्र श्रीप्रकाशात्मयतयः शाब्दनिर्णयकाराः इत्थं मन्यन्ते- स्यादप्येवं स्फोटवादस्य विजयो यदि वर्णातिरिक्तपदवित्तिरस्मदादेरुत्पद्य-मानानुभूयेत। परन्तु सैव नानुभूयते, वर्णानामेव प्रत्यक्षेणग्रहणात्। तथा हि- स किं स्फोटः श्रोत्रजप्रत्यक्षविषयः? उत मानसप्रत्यक्षविषयः इति विचारणीयम्। तत्र यद्याद्यः कल्प इष्यते तदा किं स्फोटः करचरणाद्यनेकाङ्गव्यासङ्गीचैत्रवत्

बहुवर्णव्यासङ्गीपदार्थान्तरमिति मतम्, उत वर्णसम्बन्धरहितः स्वतन्त्रः पदार्थ इति मतमिति वक्तव्यम्। अत्र प्रथमः कल्पः नो नः क्षोदक्षमः यतः स्फोटभेदपरिज्ञानाय तत्तत्पदस्फोटगतसर्ववर्णानां ज्ञानं तत्तत्पदस्फोटप्रत्यक्षं प्रति कारणमिति वक्तव्यम्, ततश्च युगपत् सर्ववर्णोपलम्भायोगस्य भवतैव प्रसाधितत्वात् स्फो श्रवणज-प्रत्यक्षविषयो न भवतीति सिद्धम । नापि द्वितीय कल्पः वर्णज्ञानं विना स्फोटप्रत्यक्षप्रसङ्गात्। वर्णज्ञानं विनैव स्फोटप्रत्यक्षं भवति चेत् संहितासु पदभेदे पदैक्यसंशयो न स्यात्। एवं च पदस्फोटः न श्रोत्रजप्रत्यक्षविषयः। यदि द्वितीयः सर्ववर्णप्रत्यक्षाभा-वादेव न स्फोटप्रत्यक्ष मुपपद्यते । वर्णासम्बद्धश्चेत् स्फोट; वर्णाविबोधं विनापि स्फोट धीः स्यादिति पूर्वोक्तदोषापत्तेः। एवं च पदस्फोटो न श्रोत्रप्रत्यक्षविषयः नापि मानसप्रत्यक्षविषय इति स्थितौ वर्णातिरिक्तस्फोटस्य प्रत्यक्षसिद्धत्वात्र तस्यापलापस्तकैः शक्य इति तु रिक्तं वचः। भवतु प्रत्यक्षेण स्फोटासिद्धिरनुमानेन तत्सिद्धिः सिद्ध्यतीति चेन्न; अनुमानं हि अर्थधीलक्षणकार्यलिङ्गेन स्यात् हेत्वन्तरस्यानुपलब्धेः। तथा सति स्फोटे ज्ञातेऽर्थधीस्ततश्च स्फोटधीरिति परस्पराश्रयः । सत्तया हेतुत्वान्नेतरेतराश्रय इति चेत् तदा स्फोटस्य नित्यत्वाङ्गीकारात् नादैर्विनापि सर्वदार्थबोधप्रसङ्गः इति सुषुप्त्याद्यभावप्रसङ्गः स्यात्। तदुक्तं वाचस्पतिमिश्रे[2] **"नापि तदतिरिक्तः स्फोटात्मा, तस्यानुभवानारोहात्, अर्थधियस्तु कार्यात्तद-वगमे परस्पराश्रयप्रसङ्गः। सत्तामात्रेण तु तस्य नित्यस्यार्थधीहेतुभावे सर्वदार्थप्रत्ययोत्पादप्रसङ्गः, निरपेक्षस्य हेतोः सदातनत्वात्"** इति ।

यत्तु यावद्वर्णव्यङ्ग्यो वा यत्किंचिद्वर्णव्यङ्ग्यो वा चरमवर्णव्यङ्ग्यो वाखण्डपदस्फोट इति विकल्पानां पक्षत्रयमपि क्षेदक्षममिति समाधानमभ्यधायि, तच्चिन्त्यम्। यतः यावद्वर्णज्ञानस्य युगपत् सम्भवस्य तैरेव व्यासेधात प्रथमपक्षस्वीकरारे स्फोटप्रतिपत्तिरेव न स्यात्। नहि गोत्वमिव खण्डादौ एकवर्णज्ञानेन पदस्थसर्ववर्ण-सम्बद्धोऽसम्बद्धो वा स्फोटोऽभिव्यज्यते, तथा सति संहितासु पदभेदे पदैक्यसंशयो न स्यादिति द्वितीयपक्षस्वीकारोऽपि न क्षोदक्षमः। तृतीयपक्षस्वीकारे च स्फोटकल्पनैव व्यर्था स्यात्, पूर्वपूर्वर्ण-संस्कारसहकृतान्तिमवर्णेनैवार्थबोधोपपत्तेः। स्फोटपक्षे लाघवप्रदर्शनं च प्रमाणेन स्फोटसिद्धावेव युज्यते। स्फोटसिद्धौ च प्रत्यक्षादिप्रमाणानां पूर्वं निराकृतत्वात् **"धर्मीकल्पनातो वरं धर्मकल्पनेति"** न्यायात् पूर्वपूर्ववर्णसंस्कारसहकृतान्तिमवर्ण एव अर्थबोधकत्वकल्पनमतिरिक्त-स्फोटकल्पनापेक्षया लघु। एतेन पर्यायस्थले पौर्वापर्यरूपानुपूर्वी-विशिष्टस्फोटस्यैव वाचकत्वाङ्गीकारान्न कोऽपि दोषलेश इति समाधानं च निरस्तम्, धर्म्यन्तरतद्गतशक्तिकल्पनापेक्षया क्लृप्तेषु वर्णेषु भेदेनापि शक्ति कल्पनस्य लघुत्वात् ।

ननु स्फोटे निरस्ते कथमेकपदावभास उपपद्यत इति चेत्, उच्यते- वर्णेष्वेवौपाधिको ऽयमेकपदावभासः यथा वृक्षेष्वनेकेषु वनमित्यव-भासः। अत्र एकार्थबोधनसामर्थ्यमेवोपाधिः। तथा चैकार्थबोधन-सामर्थ्योपाधौ वर्णा एव पदबुद्धिभाज इति नातिरिक्तस्फोटकल्पन-मपेक्षितम्। एतानि ग्रन्थकारैः स्फोटनिराकरणकारणानि संगृह्योक्तम्।

**वर्णातिरेकि नाध्यक्षं वर्णाः सोपाधिकाः पदम्।**

**अर्थे बुद्धे पदं नैकं योगः शब्दान्तरेऽपि न ।। १५ ।।[3]**

वर्णातिरिक्तः स्फोटो न प्रत्यक्षगम्यः सोपाधिकाः वर्णा एव पदबुद्धिभाज; शक्त्यवधारणानन्तरमेव स्फोटोऽवगम्यत अन्यथा पदैक्ये नैकं पदमिति संशयो न स्यात्, योगः उपपत्तिः वर्णेभ्योऽर्थप्रत्यय इत्यनङ्गीकारे वर्णेभ्यः स्फोटोऽभिव्यज्यत इत्यत्रपि उपपतितर्न स्यादिति संक्षेपेण श्लोकस्यास्य व्याख्या।

**स्फोटनङ्गीकारे समापतितानामापत्तीनां समाधिः-**

स्फोटानङ्गीकारे समुदितानामेकस्मृतिसमारोहिणां वर्णानामर्थधी-हेतुत्वं वक्तव्यम्, तथा सति नानावर्णेषु एकार्थधीहेतुत्वेनैकत्वावभास इति "एकपदम्" इति प्रतीतिरुपपादनीया, तथा चैकार्थधीहेतु-त्वेनैकत्वमेकत्वेन चैकार्थधीहेतुभाव इति परस्पराश्रयतापत्तिरिति चेत् उच्यते- बालेन स्वस्यैकस्मृत्यारूढवर्णानां मध्यमवृद्धं प्रत्येकार्थधीहेतुतामनुमायैकपदत्वाध्यवसायान्नेतरेतराश्रयम्।

स्फोटवादिनापि एवमेवान्योन्याश्रयपरिहार उपपादनीयः। तथाहि-काव्यश्लोकादिश्रवणे तदन्तर्गतपदानां तत्तदर्थेष्वगृहीतशक्तिकस्यापि पुंस इदमेकपदमिदमेकं पदमित्यादिक्रमेणैतावन्त्यत्र श्लोके पदानीत्यवधारणापत्तेः प्रजापतेहृदयादिशब्दानां सामविशेषादिषु रूढिमजानतोऽप्येतदेकं पदमित्यवधारणापत्तेश्च वारणाय एकार्थधी-हेतुत्वरूपवाचकत्वावगत्यैव स्फोटवादिनाप्येकपदाध्यवसानं वक्तव्य-म्, तथा च स्फोटे ज्ञातेऽर्थधीस्ततश्च स्फोटधीरित्योन्योन्याश्रयता। एवं चायमन्योन्याश्रयदोषो मतद्वयेऽपि तुल्य उभाभ्यामेव-मेवोपपादनीयः। इति तत्परिहारोऽपि ननु स्फोटानङ्गीकारे वर्णा एव सामस्त्येनेकबुद्धिविषयतामापद्यमानाः पदं स्युस्ततो जारा राजा कपि पिक इत्यादिषु त एव वर्णा इतरत्र चेतरत्र च प्रत्यवभासन्त इति पदविशेषप्रतिपत्तिर्न स्यादिति चेत्।

अत्रैवं समाधिः। समस्तवर्णप्रत्यवमर्शे सत्यपि यथा क्रमानुरोधिन्य एव पिपीलिकाः पङ्क्तिबुद्धिमारोहन्ति, एवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोक्ष्यन्ति, तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्न विरुध्यते । तदुक्तं भट्टाचार्यैः-

**यावन्तो यादृशा ये च पदार्थप्रतिपादने।**

**वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः ।। इति ।।[4]**

ननु नित्यानां विभूनां वर्णानां कथं क्रमः? कथं वा पदत्वज्ञानेनार्थधीहेतुत्वमिति चेत्। सत्यम्, वर्णा नित्याः विभवश्चातः स्वतस्तेषु क्रमो नोपपद्यते तथापि न दोषः। यतः व्युत्पत्तिदशा-यामुच्चारणक्रमेणोपलब्धिक्रममुप-लभ्यमानेष्वारोप्यैते वर्णा एतत्क्रमै-तत्संख्यावन्त एतदर्थशक्ताः इति गृहीताः सन्तः श्रोतुः प्रवृत्तिकाले तथैव स्मृत्यारूढा स्वस्वार्थं बोधयन्तीति जारा राजा कपि पिक इत्यादिषु पदविशेषप्रतिपत्तिः सङ्गच्छत एव।

ननु मौनिश्लोके उच्चारणक्रमाभावात् तथा मौनिलिखितलिप्यक्षरैर्युग-पद्वर्णानुमितिस्थले अनुसन्धानक्रमस्याप्यभावात् कथं पदविशेषप्रति-पत्तिरिति चेत्। न दोषः, तत्रापि क्रमिकलिपिभिर्लेखकानुसन्धान-क्रमविशेषितवर्णानुमित्युपपत्तेः। इयञ्चापत्तिः शब्दानामर्थविशेष-वाचकत्व- स्यैकस्फोटव्यञ्जकत्वस्य वानुसन्धानाभावे स्फोटाभिव्यञ्ज-कत्वासम्भवात् तदनुसंधानस्य च वर्णक्रमविशेषावगतिसापेक्षत्वात् स्फोटवादिनामुपर्यप्यापतति। अस्या आपत्तेर्वारणाय स्फोटवादिभि-रप्यवश्यमेवं क्रमिकवर्णानुसन्धानमुपपादनीयम् । तदुक्तं भट्टाचार्यैः-

**केनचिद्धर्मभेदेन जराराजेतिवत् क्रमात् ।**

**पदावधारणोपायान् बहूनिच्छन्ति सूरयः।।**

**क्रमन्यूनातिरिक्तत्वस्वरवाक्यस्मृतिश्रुतीः ॥ इति ॥[5]**

ननु स्फोटानङ्गीकारे वर्णसमुदायस्यैवैकत्वप्रत्ययविषयत्वे सन्ध्यक्ष-राणामप्यकारादिवर्ण- समुदायत्वापत्तिरिति चेत्। इष्टत्वान्न दोषः। अत एव मीमांसकैः ऋक्षु सन्ध्यक्षराणां सतां गीतिकाले वृद्धत्वं प्राप्तानां ये आईभावा आऊभावा न ते स्तोभवद् वर्णान्तरागमरूपा; किन्तु वृद्धेषु संध्यक्षरेषु संश्लिष्टतया स्थितानामवर्णेवर्णोवर्णानां गानकाले विश्लेषमात्रगीतसंख्यक्षराभिव्यञ्जकमित्युक्तम्। आश्वलाय-नाचार्यैरपि याज्यान्ते श्रुतानां संध्यक्षराणामकारं विश्लेष्य अकारमिति तं श्रावयेद् इति विहितम्। पाणिनिनापि **"प्लुतावेच इदुतौ"** इति सूत्रेण ऐतिहायन औपगवेत्याद्युदाहरणेषु "गुरोरनृतोऽनन्त्यस्य" इत्यादिसूत्रैरेचः प्लुतप्रसङ्गे तस्यान्त्यावयवाविकारोकारौ प्लवेते न तु तदाद्यावयवोऽकारो ऽपीति नियमितमनेन संध्यक्षराणाम-कारादिवर्णसमुदायत्वं व्याकरणसूत्रकाराणामपीष्टमिति ज्ञायते । किं च श्रुतावपि "तान्नैकधा समभरत्तदेतदोम्" इति प्रणवस्य मात्रात्रयरूपत्वमुक्तम्। अथ संध्यक्षराणामेकारोकारादीनां वर्णसमुदा-यत्वे माहेश्वरसूत्रेषु तेषां पृथग् गणनं किमर्थमिति चेत्; न, उच्यते माहेश्वरसूत्रेषु हि कार्यविशेषार्थतया वर्णानां नियतक्रमेण परिगणनं कृतमस्ति अतो न तेषा वर्णसंख्यानियामकत्वम् । अन्यथा हकारस्य द्विवारंपठितत्वात् तदुनसृत्य वर्णा अप्यधिकाः स्युः। क्वचिल् 'लण्' सूत्रे अकारग्रहणमन्यत्राकारस्योच्चारणार्थत्वमिति वृत्तिकाराणां वृत्तिरप्यत एवोपपद्यते। एवं च वृद्धिसंज्ञादिकार्यविशेषसिद्ध्यर्थतया माहेश्वर-सूत्रेषु एकारादीनां पृथक् परिगणनमिति न दोषः। तदुक्तं परिमलकारैः - **"एवं संध्यक्षराणां वर्णसमुदायरूपत्वेपि तेषां मातृकासु पृथक् परिगणनं क्षकारपृथक्परिगणनवत् प्रत्याहारसूत्रेषु हकारस्य द्विरुपादानवत् कार्यविशेषार्थतयोपपद्यते"** इति।

ननु वर्णसमुदायातिरिक्तस्फोटानङ्गीकारे एकत्वादिसमुदायातिरिक्त-शतादिसंख्यापि न सिद्ध्येत्, कपालतिरिक्तघटोऽपि न सिद्ध्येदिति चेत् । उच्यते -इष्टापत्तेः। एकत्वादिसमुदायातिरिका शतादिसंख्या

नास्त्येव। तदुक्तं भाष्ये[6] **"सम्भवत्यनेकस्यापि एकबुद्धिविषयत्वं पङ्क्तिर्वनं सेना शतं सहस्रमित्यादिदर्शनादिति।"** यदि त्वेकत्वसमुदायातिरिक्तशतादिसंख्यानङ्गीकारे शतसंख्या कियतां च शतस्यैकत्वानां समुदायः कियतामेकत्वानां समुदायः सहस्रसंख्येत्यानवधारणादव्यवस्था स्यात्। शतसंख्येत्यादिव्यवस्थाकल्पने संख्यागततया शतादिसंख्याकल्पनं वक्तव्यम्। अत एकत्वादिसमुदायातिरिक्तशतादिसंख्याङ्गीकरणमनिवार्यम्। **"शतं सहस्रम्"** इति भाष्यं तु घटादिरूपसंख्येयाभिप्रायमिति समर्थयते, तह्यु पन्यस्तकल्पकप्रमाणवशादतिरिक्तशतादिसंख्याकल्पनायामऽपि वर्णसमुदायातिरिक्त स्फोटो न कल्पनीयः कल्पकप्रमाणाभावात्। न हि एकमङ्गीकृतञ्चेदन्यदप्यङ्गीकार्यमिति काचन राजाज्ञा, प्रत्यक्षादृष्टेश्वरस्य स्वीकारात् प्रत्यक्षादृष्टस्य खपुष्पस्यापि स्वीकारप्रसङ्गात्। प्रमाणाद्धि प्रमेयसिद्धिः शतादिसंङ्ख्यासु प्रमाणसत्वात्सा स्वीक्रियते, स्फोटे च प्रमाणाभावात्स न स्वीक्रियत इत्यदोषः। एतेन कपालातिरिक्तघटोऽपि न सिद्धयेदित्यापत्तिर्निरस्ता। जलाहरणादिकार्यकरस्य घटस्य प्रत्यक्षसिद्धत्वात्। अथवा मास्तु कपालातिरिक्तघटसिद्धिः अरम्भणाधिकरणन्यायेन कारणात् व्यतिरेकेण कार्यस्याभावात् ।

एवञ्च पदस्फोटे प्रमाणाभावात् कल्पितस्फोटानङ्गीकारे च वैयाकरणैरारोपितानामापत्तीनां निराकरणात् वर्णातिरिक्तपदादर्थप्रत्यय इति वैयाकरणानां मतमयुक्तमिति सिद्धम्।

**पाद टिप्पणी**

[1] शाब्दनिर्णय श्लो. सं. १२.१३

[2] भामती, १.३.२८

[3]शाब्दनिर्णयः १५

[4] श्लोकवार्तिकम्, पृ.सं.३७३

[5] श्लोकवार्तिकम्, १.१.७.पृ.सं.६३२

[6] ब्रह्मसूत्रशाङ्करभाष्यम्